# लग्नफल-विमर्शः

**रंजीत दूबे**
शोधच्छात्र, ज्योतिष विभाग, सं०वि०ध०वि०सं०, का०हि०वि०वि०, वाराणसी

ज्योतिशास्त्रानुसारं फलनिर्धारणप्रक्रियायां लग्नस्यात्यन्तं विशिष्टतमं स्थानं भजते। अत एव भास्कराचार्येण कालविधानात्मकज्योतिषशास्त्रस्यादेशं लग्नकेन्द्रितस्वीकार्य कुर्वन् लग्नस्फुटे विशेषबलं दत्तम्, यथा -

**ज्योतिषशास्त्रफलं पुराणकैरादेश इत्युश्रच्यते**
**नूनं लग्नबलाश्रितःपुनरयं तत् स्पष्टखेटाश्रयम्।**
**ते गोलाश्रयिणोऽन्तरेण गणितं गोलोऽपि न ज्ञायते**
**तस्माद्यो गणितं न वेत्ति स कथं गोलादिकं ज्ञास्यति ।।**[1]

क्रान्तिवृत्तस्य यो राशप्रदेशे जातकजन्मसमये पूर्वक्षितिजे भवति सैव तात्कालिकः स्पष्टलग्नो जायते।

**यत्र लग्नमपमण्डलं कुजे तद्गृहाद्यमिह लग्नमुच्यते।**
**प्राचि पश्चिमकुजेऽस्तलग्नकं मध्यलग्नमिति दक्षिणोत्तरे ।।**[2]

भारतीयज्योतिषपरम्परायां क्रान्तिवृत्तं समाद्वादशभागेषु विभक्त्य मेषादिद्वादशराशीणां परिकल्पना कृता, स्व - स्व क्षितिजसम्पर्केणात्र मेषादिद्वादशराशये क्षदशलग्नरूपे पठितमस्ति। प्रत्येक लग्नं क्षितिजे उदये जायमाने पञ्चधटिकात्मकं समयं स्वीकरोति। अर्थात् होराद्वयम्  सूर्योदयकाले सूर्यो हि स्पष्टप्रथमलग्नं भवति यतो हि समसूत्रं संलग्नं प्रतीयमानं क्रान्तिवृत्तं सन्नधः स्पष्टसूर्यो हि क्षितिजे संलग्नः प्रतीतो भवति। मध्याह्नकाले मध्याह्नकालिकस्पष्टसूर्यो हि दशमलग्नं वर्तते। यतो हि क्रान्तिवृत्तं गतसूर्योर्ध्वयाम्योत्तरे संलग्नं भवति। सायंकाले स्पष्टसायं कालिकसूर्यः सप्तमलग्नं तथा चार्धरात्रिकालिकस्पष्टसूर्यः चतुर्थलग्नरूपे व्यवहृतो जायते परञ्च लग्नपदात् मुख्यरूपेण प्रथमलग्नस्यैव विचारः क्रियते।

**लग्नस्याभिप्रायः -**

अयं भूगोलः स्वधुर्यां सततभ्रमणशीलोऽस्ति। तथा च अनेन परिचंक्रमणे चतुर्विंशतिहोरात्मकं समयं स्वीक्रियते। अस्माभिः दिनमपि कथ्यते। अनेन प्रकारेणाक्षभ्रमणं कुर्वन्ती पृथ्वी क्रान्तिवृत्तस्थिते यस्य राशेः सम्मुखमागच्छति तस्याः राशेः लग्नं तस्मिन् समये उदयं भवति इति मन्यते। प्रकारेणानेन पृथ्व्याः प्रत्येकोऽश राशिमण्डलस्य प्रभावे भवति। एवञ्च पृथ्व्याः यो भागो यस्याः राशेः समक्षं भवति तस्मिन् भागे तत् लग्नं विशेषसिद्ध भवति। पृथ्व्याः गत्याः साकं तत् लग्नं व्यतीतो जायते। प्राये होराद्वयात्मकं लग्नं जायते। प्रायसः चतुरनिमेषे पृथ्वीः स्वधुर्यां अंशमेकं भ्रमति। परिभ्रमन् चतुर्विंशतिहोरायां ३६० अंशे पूर्णं करोति। अतो लग्नमानं चतुरमिमेषैकाशं एधते। सूर्यो यस्याः राशौ भ्रमणशीलो भवति, सैव राशिः सूर्योदये क्षितिजे लग्नरूपे विद्यमानो भवति। यस्मिन् समये सूर्यः सरूस राशेः यस्मिन् अंशे यस्यां  कलायाञ्च स्थितो भवति। सूर्योदये तल्लग्नं तस्मिन् कलांशे विद्यमानं भवति। अहर्निशयोः भेदकत्री सूर्यगतित्यन्तमहत्वपूर्णा भवति। अस्य राशिमण्डलस्य  प्रथमराशौ भ्रमणशील भूते सति नववर्ष प्रारभते। मीनराशेः त्रिंशदंशे सूर्यप्राप्तैव वर्षसमाप्तिः भवति सूर्यः चतुविंशतिहोरायां अंशमेकं एधते। अस्मिन् काले द्वादशलग्नं संस्थितं भवति। मेषादिलग्नफलं पृथक्-पृथक् ग्रन्थेषु वर्णितमस्ति।

**लग्नगतमेषराशेः फलम् :-**

मेषलग्नस्य स्वामी मंगलं भजते। तथा च लग्नमिदमश्विनीभरणीकृत्तिका पादे समाहितो भवति। मेषाराशिः पुरुषसंज्ञकः तथा च चरसंज्ञकोऽर्थात् सदैव चलायमानः राशिऽस्ति। अग्नितत्वं वर्तते। अस्याङ्गसुदृढो जायते। अस्य

[1] सि. शि. गो. आ. शो. 6
[2] सि. शि. त्रि. वा आ. शो. 26

चतुरचारणा: भवन्ति। रक्तवर्णीय:, उष्णस्वभाव:, पित्तप्रकृति: , गम्भीरशाब्दिक:, पर्वतचारी, स्वभावेण क्रूर:, प्राचीदिशाया: स्वामी वक्रोदयो भवति। न्यूनापत्यकान्तिहीनक्षत्रियवर्णीय: च भवति।

आचार्यमन्त्रेश्वरस्य मतमस्ति यत् यस्य जातकस्य जन्म मेषलग्ने भवति तस्य गोलनयनं भवति तथा च दुर्बलजानु:, रूग्ण:, जलभयी, अल्पहारी, कामुक:, यायावर:, चपल:, मृषाभाषी, व्रणचिह्नयुक्त: च भवति।[1] अस्मिन् क्रमे जातकभरणकारानुसारेण मेषलग्ने उत्पन्न: जातकोऽभिमानगुणक्रोधयुक्तस्वमित्रविरोधी, स्वपराक्रमेण यशप्रापको भवति।[2] वृद्धजवनजातकस्य मतं दृष्टव्यमस्ति यत् यदि मेषलग्ने जन्मो जायते तर्हि मनुष्योग्रस्वभावयुक्त: धनिक: सर्वकलाशिल्पकलाव्यवहारेषु निपुण: स्वपक्षनाशकोऽतिक्रुद्ध:, मन्दबुद्धि: भवति।[3] रामानुजाचार्यै: भावार्थरत्नाकरे स्वकीयं मतं प्रकटितं यत् मेषलग्ने जातस्य जातकस्य जन्मकुण्डल्यां यदि चतुर्थपञ्चमभावयो: स्वामी परस्परसम्बन्धो भवेत् चेत् जातको निश्चयेन राजयोगं प्राप्नोति।[4]

**लग्नगतवृषराशिफलम् -**

अस्या: राशे: स्वामी शुक्रोऽस्ति। वृषराशौ उच्चचन्द्रो भवति। वृषराशि: स्थिरसंज्ञक: स्त्रीराशि: पृथ्वीतत्वं, शीतलप्रकृति: दक्षिणदिक्स्वामी, सुभूमि, वातात्मकरात्रौ बलि: चतुष्पद: स्वच्छवर्ण:, उच्चशाब्दिक:, सामान्यसंततियुक्त: जातिना वैश्यो वर्तते। लग्नचक्रस्य द्वितीयराशि: वृष, स्थिर स्वभावसौम्यप्रकृतिवान् राशि: जायते। इयं राशि: मानवशरीरे सुखं संवेदति। पृष्ठोदसेयं राशि:। अस्य स्वार्थपूर्णं नैसर्गिक: स्वभाव:। विवेकपरिश्रमयुक्त: सांसारिक व्यवहारकुशलश्च अयम्। वृषलग्नस्य गणना श्रेष्ठेषु जायते। कालपुरुषस्य ग्रीवाया: प्रतिनिधित्वं सम्पादयति। वृषराशे: सांकेतिकचिह्नं श्रृंगयुक्त: वृषभो वर्तते।

आचार्येण फलदीपिकायां लग्नगतवृषराशे: विवेचनम् अनेन प्रकारेण कृतमस्ति। वृषलग्ने जातस्य जातकस्य मुखस्थूल उरुविशालकायं च भवति। जातक: कृषिकर्मेण आजीविकां प्राप्नोति। जीवनस्य मध्ये जीवनान्ते च सुखं प्राप्नोति स्त्रीप्रिय: च भवति। स: त्यागी सहनशील:, कष्टेनयुक्त, संगीतशास्त्रेण विश्वविश्रुतं भवति ।[5] क्रमेऽस्मिन् जातकाभरणकारणकारानुसारेण वृषलग्नोत्पन्न: पूरूषो गुणिषु धनयुक्त: गुरूभक्त:, वीर:, धीर: मृदुभाषी, शान्तचित्तयुक्तो जायते।[6] अथ च वृद्धयवनजातककारमते यदि वृषलग्ने जन्मो जायते चेत् मित्रम्, क्षमायुक्तो हास्यकार्येरत:, मृदुभाषी, विशिष्टज्ञानसुङ्क्त: पूव्रजाग्रजाणां प्रिय: शूर:, प्रधान:, पुत्रेच्छाावान् भवति।[7] श्रीमद् रामानुजाचार्येण विभिन्नानि मतानि दृष्यते। वृषलग्ने जन्मे शनि: केन्द्रत्रिकोणयो: (नवमदशमयो) स्वामी भवन्नपि योगजशुभफलप्राप्तिर्भवितुं नहिति यदा सूर्यबुधयो युति न स्यात् ।[8]

**लग्नगतमिथुनराशे: फलम् -**

बुधो मिथुनलग्नस्य स्वामी इति बुधै: प्रोकतम्। अयं प्रतीचीदिशाया: प्रति करोति। अयं वायुतत्वहरितवर्ण-द्विपदराशिपुरुषसंज्ञकद्विस्वभावसंज्ञकविषमोदयोष्णप्रकृति साधारणजनवनेचरोच्चशाब्दिकस्यन्दकान्तियुक्तक्रुरश्च भवति। इयं

---

1 वृत्तेक्षणे दुर्बलजानुरूग्ग्रो भीरूर्जले स्याल्लघुभुक् सुकामी।
सश्चारशीलश्चपलोऽनृतोक्तिर्व्रणाङ्कितााङ्कः क्रियभे प्रजातः।। फलदीपिका 09/01

2 चण्डाभिमानी गुणवान् सकोपः सुहृद्विरोधी च सखा परेषाम्।
पराक्रमप्राप्तयशोविशेषो मेषोदये यः पुरूषोऽतिरोषः ।। जातकाभरण,लग्नफल 01

3 मेषे विलग्ने तु भवेत्प्रसूतश्चण्डो धनी सर्वकलासु दक्षः।
स्वपक्षहन्ता बहुमन्युयुक्तो मन्दमतिस्तीक्ष्णकरः सदैव।। वृद्ध यवन जातकम् 24/01

4 मेंषलग्ने तु जातस्य राजयोगीऽपि लभ्यते।
चतुर्थपंचमाधीश संबन्धेन न संशयः ।। भावार्थ रत्नाकर 01/01

5 पृथूरूवक्रः कृषिकर्मकृत्स्यान्मध्यान्तसौख्यः प्रमदामियश्च।
त्यागी क्षमी क्लेशसहश्च गोमान् पृष्ठास्यपार्श्वोऽङ्कयुतो वृषोत्थः ।। फलदीपिका 09/02

6 गुणीग्रणी स्याद् द्रविणेन पूर्णो भक्तोगुरुणां हि रणप्रियश्च।
धीरश्च शूरः प्रियवाक् प्रशान्तः स्यात्पूरूषो यस्य वृषे विलग्ने ।। जातकाभरण लग्नफल 02

7 वृषे विलग्ने तु नरः प्रसूतो मित्रं क्षमी हास्यरतः सुवाक्यः ।
विज्ञानयुक्तो गुरुलोकभक्तः शूरः प्रधानः सुतलालसश्च।। वृद्ध यवन जातकम् 24/02

8 वृषभजातस्य च शनिः भाग्यकर्मेश्वरोऽपि वा।
सूर्यसोमसुताभ्याम् वा न युक्रतौ नैव योगदः ।। भावार्थ रत्नाकर 01/01

नपुंसकराशिरिति कथ्यते। अस्यां राशौ नीचोच्चो न भवति। अस्यां गणना तथा शीर्षोदयो राशौ क्रियते। कालपुरुषाङ्गे ग्रीवाबाहू मिथुनराशे प्रतिनिधित्वं करोति। अस्य राशिस्वरो बुधो मस्तिष्कस्य क्षमतायाः परिचायको विद्यते।

फलदीपिकायां आचार्येण लग्नगतमिथुनराशिफलस्य विवेचनं अनेन प्रकारेण कृतम्। यदि मिथुनराशेः लग्नं भवेत् चेत् जातकस्य नेत्रश्यामलः कुंचितकोशाः च भवन्ति। सः कामार्तः अन्यभावगमकश्च भवति। उन्नतनासिकायुक्तः संगीतनाट्यादिषु रसिकः स्वकीयगृहे निवासं च करोति।[1] एवं प्रकारेण जातकाभरणेऽपि भणितं यत्, मिथुन लग्ने जातो जातको भोगीदानी बहुमित्रबहुपुत्रयुक्तः मनस्वी, धनिकः सुन्दरस्वभावयुक्तो राजपुरुषश्च भवति।[2] तदनन्तरं वृद्धजवन-जातके दृष्टव्यमस्ति यत् यदि मिथुनलग्ने जन्मो जायते चेत् कुलीन विशिष्टज्ञानयुक्तशास्त्रज्ञसम्मानितपूज्य-शत्रुनाशकजितेन्द्रियधनिकश्च भवति।[3] भावार्थरत्नाकरग्रन्थानुसारं यदि जातको मिथुनलग्ने जायते तथा च सूर्यबुधौ तृतीयभावे स्थितौ भवेत् चेत् स्वान्तर्दशायां दशायां वा धानदायको बुधो भवति।[4]

**लग्नगतकर्कस्य राशिफलम् -**

पतिं कर्कस्य चन्द्रमा अस्ति। कर्कराशिः बहुसन्तानाधिकचरणचरसंज्ञकस्त्रीराशि- पाटलवर्णमन्दस्वरसौम्यराशिक-फप्रकृतिसनेहजत्लतत्वजलजीवी समोदय ब्राह्मणवर्णादिः परिचायो भवति। अस्य लग्नस्य समयो नवदशनिमेषाधिक-होराद्वयात्मकं भवति राशौ बृहस्पत्युच्चमङ्गलनीचफलमं प्रदानं करोति। अन्तर्गतेऽस्मिन् पञ्चांशे वृहस्पति उच्च तथा च अष्टाविंशति(28) अंशे मङ्गलनीचतमं भवति। कर्कराशिगतसूर्यमंगलबृहस्पतयोमित्रवदाचरणं करोति। परञ्च शुक्रबुधशनयः शत्रुवद्व्यवहारन्ति।

फलदीपिकायां आचार्येण मन्त्रेश्वरेण लग्नगतकर्कराशिफलविवेचनमनेन प्रकारेण कृतम्। कर्कलग्ने जातो जातकः स्त्रीभिः पराजितः स्थूलग्रीवायुक्तः च भवति। बहुमित्रनैकभवनस्वामीधनसम्पन्नः च भवति। तस्य कटिप्रदेशं स्थूलं जायते। स्वभावेन मेधावी, जलप्रिये न्यूनापत्युक्तो भवति।[5] क्रमेस्मिन् जातकाभरणकारस्य मतमस्ति यत् कर्कलग्ने यस्य जन्मो जायते सः मिष्ठान्नप्रियसाधुसंगतियुक्तोनम्रचंचलबुद्धिजलक्रीडाप्रियतत्वग्राह्ययुत्दारश्च भवति।[6] वृद्धजवनजातकस्य मतं विद्यते यत् यदि कर्कलग्ने जन्मो जायते चेत् मनुष्यः नीतिपरायणन्यायप्रियः, रूग्णः, असम्भावितरोगकल्पनाकरः, अभिष्टफलप्राप्तकरः, सौभाग्ययुक्तः कामुकमननपरायणविचारशीलगुरुप्रियश्च भवति।[7] भावार्थरत्नाकरग्रन्थानुसारं विभिन्नमतानि दृष्टव्यानि सन्ति। कर्कलग्ने जाते जातकाय गुरुः विशेषधनप्रदो न भवति। परञ्च मकरलग्ने जाते जातकस्य कृते बुधो विशेषधनप्रदो भवति।[8]

**लग्नगतसिंहराशेः फलम् –**

सिंहराशिः राजस्राशिरिति कथ्यते। सूर्योऽस्य स्वामी वर्तते। इयं शीर्षोदयो राशिः। स्थिरसंज्ञकाग्नितत्वात्मक-पीतवर्णीयकान्तिहीनपित्तप्रकृत्युष्णस्वभावपुष्टशारीरीमहाशब्दकारीपर्वचरक्षयवर्णक्रूरसंज्ञकधूम्रवर्णीयश्च भवति।

---

1 श्यामेक्षणः कुचिंतमूर्द्धजः स्त्रीक्रीडानुरक्तश्च परेङ्गितज्ञः।
उत्तुङ्गनासः प्रियगीतनृत्तो वसन् सदान्तः सदने च युग्मे ।। फलदिपीका 09/03

2 भोगी वदान्यो बहुपुत्रमित्रः सुदृढमन्त्रः सधनः सुशीलः।
तस्य स्थितिः स्यान्नृपसन्निधाने लग्ने भवेद्वै मिथुनाभिधाने ।। जातकाभरण लग्नफल 03

3 तृतीयलग्ने तु नरोऽभिजातो विज्ञानविद्यागमशास्त्रलुब्धः।
स्वपक्षपूज्यः परपक्षहन्ता जितेन्द्रियः स्याद्बहुवित्तयुक्तः॥ वृद्ध यवन जातकम् 24/03

4 तृतीयस्थौ रविबुधौ बुधदाये समागमे।
बुधो योगप्रदस्सत्यं युग्मजातस्य भाग्यदः।। भावार्थ रत्नाकर 01/01

5 स्त्रीनिर्जितः पीनगलः समित्रो बहवालयस्तुङ्गकटिर्धनाढ्यः।
ह्रस्वश्च वक्रो द्रुतगः कुलीरे मेधान्वितस्तोयरतोऽल्पपुत्रः ।। फलदिपीका 09/04

6 मिष्टान्नमुक् साधुरतो विनीतो विलोमबुद्धिर्जलकेलिशीलः।
प्रकृष्टसारोऽतितरामुदारो लग्ने कुलीरे हि नरो भवेद्यः ।। जातकाभरण लग्नफल 04

7 लग्ने कुलीरे यदि संप्रसूतो नयप्रियोऽसृष्टरुगिष्टयोगः।
सौभाग्ययुक्तो रतिलालसश्च मन्त्रोपसेवी गुरुवत्सलः स्यात्॥ वृद्ध यवन जातकम् 24/04

8 कर्किजातस्य च गुरुर्विशेषेण न योगदः।
मकरे जायमानस्य बुधो योगप्रदो भवेत् ।। भावार्थ रत्नाकर 01/01

फलदीपिकायां मन्त्रेश्वरेण सिंहलग्नफलविवेचनमनेन प्रकारेण कृतमस्ति। सिंहलग्नोत्पन्नस्य जातकस्य पाण्डुनयनम् चिबुकञ्च स्थूलं भवति। विशालमुखं भवति। अत्यभिमानी पराक्रमी च भवति। निरर्थककार्यै: कुपितं जायते। अटनशीलस्वमातृकृपापात्रस्थिरबुद्धियुक्तो भवति।[1] क्रमेऽस्मिन् सिंलग्नविषये जातकभरणकारस्य मतं विद्यते यत् यस्य जातकस्य जन्म: सिंहलग्ने जाते सति कृषकटिसम्पन्नसुन्दरपराक्रमभोगसंयुक्ताल्पापत्याहार्यभिमानबुद्धियुक्तो भवति।[2] अथ च वृद्धयवनजातकस्य मतं द्दष्टव्यमस्ति यत् सिंहलग्ने यदि जातकस्य जन्मो जायते चेत् स: शत्रुनाशकभाग्यफलन्यूननिर्धनबहुभोजीनिलज्जसंकोचहीनो भवति। सद्भि: निन्दित: नीच कार्येषुरत: कृतघ्नश्च भवति।[3] दैवज्ञेन रामानुजाचार्येणानुसारेण विभिन्नमतं प्रस्तुयते। यदि सिंहलग्ने जन्मो जायते तथा च सूर्यबुधमङ्गलानां परस्परद्दष्टिद्वारा सम्बनधो भवेत् तदा जातको धनिको जायते।[4]

**लग्नगतकन्याया: फलम् -**

कन्यालग्ने द्विस्वभावलग्नोऽस्ति। तस्य स्वामी बुधो बुधैरिति उक्तम्। अस्य प्रकृति सौम्योऽस्ति। इयं राशि: एकैव राशि: यस्य स्वामी बुधो अस्या: राशे: पञ्चदशांशे परमोच्चो भवति। बुधस्य मूलत्रिकोणरपि अस्य राशे: षोडशांशात् विंशात्यंशपर्यन्तं भवति। शीर्षोदयादइयं राशि:। पिङ्गलवर्णद्विचरणस्त्रीराशिद्विस्वभावसंज्ञकदक्षिणदिक्स्वामीरात्रिबलिवायु - तत्वशीतलस्वभावसमोदयभूचरन्यूनशाब्दिकपवित्रभूनिवासीशुभशुभराशिन्यूनसन्तानवैश्यव- र्णसंयुक्तकान्तिहीनश्च भवति।

मन्त्रेश्वरेणाचार्येण लग्नगतकन्याराशिफलस्य विवेचनमनेन प्रकारेण कृतमस्ति। यदि जन्मलग्न कन्या स्यात् तर्हि जातकस्य स्कन्धभुजौ अधोगतौ भवति। स: प्रियवक्ता सत्यवादी च भवति। अपरस्य धनगृहाधिग्रहणादादरं प्राप्नोति। सो लज्जासिक्तनयन- संयुक्तोऽत्यन्तकुशलशास्त्रपारङ्गतातिकामी च भवति।[5] अध च लग्नगतकन्याराशौ फलं जातकमरण-कारेणानेन कृतमस्ति यत् यस्य जातकस्य जन्मो कन्या लग्नगतो भवति चेत् स: कामुकगुणीपण्डितकार्यकुशलप्रसन्ननित्य-लक्ष्मीयुक्तो जायते।[6] अस्मिन् क्रमे वृद्धजवनजातकस्य मतं द्दष्टिगोचरो जायते यत् कन्यालग्ने जातो मनुष्यो विशेषज्ञानजिज्ञासु:, विद्यार्थी, लोभी, गुरुसान्निदधप्राप्त:, कामुक:, सम्मानप्रिय:, सौभाग्ययुक्तो भवति।[7] आचार्येण रामानुजाचार्येणानुसारं विभिन्नफलं विद्यते। यदि कन्यालग्ने जन्मो जायते तथा च सूर्यशुक्रयो: उत् सूर्यचन्द्रयो: युत्यादिना सम्बन्धो भवेत् चेत् सूर्य स्वदशायां बहुधनं ददाति।[8]

**लग्नगततुलाराशे: फलम् -**

तुलालग्नचरराशे: लग्नं विद्यते। स्वामी च शुक्रो वर्तते। अत्र शनि उच्चराशौ भवति। तुलाराशेरूदय: शीर्षात् भवति। अत एवैयं राशि: शीर्षोदयराशि:। कटिभावयकृतस्थाने नियत्रणमस्य जायते। इयं पुरुषराशिबहुरङ्गवर्णसमोदय-युष्णप्रकृतिपश्चिम -दिकस्वामीवायुप्रकृतिस्नेह शाब्दिकवनचराल्पसंतयल्पसंगतिशूद्रवर्णक्ररस्वभावसमाङ्गी च भवति।

फलदीपिकायां लग्नगततुलाराशे: फलविवेचनमनेन प्रकारेण कृतमस्ति। यस्यजन्म तुलाराशौ भवति सो दुर्बलचपलोन्नताल्पसंततियुक्तो देवब्राह्मणानां प्रति आस्थावान् यायावरद्विसंज्ञाधेयो भवति। व्यापारे अतिकुशल: धैर्यवान्

---

1 पिङ्गेक्षणः स्थूलहनुर्विशालवक्रोऽभिमानी सपराक्रमः स्यात्।
कुप्यत्यकार्ये वनशैलगामी मातुर्विधेयः स्थिरधीमंगेन्द्रे ।। फलदीपिका 09/05

2 कृशोदरश्चारुपराक्रमश्च भोगी भवेदल्पसुतोऽल्पभक्षः ।
सञ्जातबुद्धिर्मनुजोऽभिमाने पञ्चानने सञ्जनने विलग्ने ।। जातकाभरण लग्नफल 05

3 सिंहे विलग्ने तु भवेत् प्रसूतो नरो विभागी रिपुमर्दनश्च ।
लग्ने विधत्ते विधनं मनुष्यं बलाशिनं नित्यविमुक्तलज्जम् ।
निन्द्यं सतां नीचरतं कृतघ्नम्॥ वृद्ध यवन जातकम् 24/05

4 सिंहलग्ने तु जातस्य रविसौम्यकुजा यदि ।
परस्परेण संयुक्ता धनबाहुल्यमादिशेत् ।। भावार्थ रत्नाकर 01/01

5 स्रस्तांसबाहुः परवित्तगेहैः सम्पूज्यते सत्यरतः प्रियोक्तिः ।
व्रीडालसाक्षः सुरतप्रियः स्याच्छास्त्रार्थविच्चाल्पसुतोऽङ्गनायाम् ।। फलदीपिका 09/06

6 कामक्रीड़ासद्गुणज्ञानसत्त्वकौशल्याधैः संयुतः सुप्रसन्नः ।
लग्नं कन्या यस्य जन्यां जघन्यां कन्यां क्षीराब्धेरवाप्नोति नित्यम् ।। जातकाभरण लग्नफल 06

7 कन्याविलग्ने तु नरः प्रसूतो विज्ञानविद्यागमशास्त्रलुब्धः ।
लुब्धो गुरुणां रतिलालसश्च मानी च सौभाग्यगुणैश्च युक्तः॥ वृद्ध यवन जातकम् 24/06

8 कन्यालग्ने तु जातस्य भृगोश्चन्द्रस्य वा यदि ।
संबन्धो यदि विद्यत रवेर्दाये धनागमः ।। भावार्थ रत्नाकर 01/01

निर्ममप्रकृतिश्च भवति।[1] क्रमेऽस्मिन् लग्नगततुलाराशेः जातकभरणकारस्य मतं विद्यते यत् तुलालग्नोत्पनमनुष्यो गुणेन द्रव्यलाभयुक्ताः वाणिज्यक्षेत्रेऽतिकुशलस्थिरलक्ष्मीसंयुक्तकुल- भूषणो जायते।[2] अथ च वृद्धयवनजातके यदि जन्मसमये तुलालग्नं विद्यमानं भवेत् तर्हि मनुष्यो बुद्धिमानस्वकार्यसंलगनः पैतृककार्यात् जीविकप्राप्तः, विदुषां प्रियः, सर्वकलाविज्ञः, चंचलप्रकृतिः स्त्रीपराजितश्च भवति।[3] रामानुजाचार्यानुसारेण विभिन्नमतं प्रस्तुयते1 तुलालग्ने जाते जातकाय शनि स्वदशायां अधिकं धनं ददाति। तृतीयषष्ठभावयोः स्वामी गुरुरपि स्वदशायां योगप्रदो भवति। शनिकेन्द्रत्रिकोणयोः (चतुर्थपञ्चमयो) स्वामी वर्तते। राजयोगफलप्रदानं करोति। ग्रन्थकारानुसारं तृतीयषष्ठभावयोः स्वामी गते सति गुरु अशुभफलदायको भवति। अस्य शुभफलस्य कारणं प्रदर्शयते यत् गुरुरपि धनकारकग्रहो वर्तते तथा च तृतीयषष्ठभावावपि उपचयभावौ स्तः, अतो गुरु आर्थिकदृष्टिकोणेन शुभफलं ददाति।[4]

**लग्नगतवृश्चिकराशेः फलम् -**

वृश्चिकलग्नस्य स्वामी मंगलोऽस्ति। इदं स्थिरलग्नं विद्यते तथा च स्त्रीराशिः, शुभ्रवणः, जलतत्वम्, उत्तरादिक्स्वामी, रात्रिबली, शब्दरहितः कफप्रकृतिसमोदयी, पह्वपत्ययुक्तः शुभराशिः स्नेहशरीरयुक्तो ब्रह्मणवर्गीयश्च भवति। अस्यां राशौ कोऽपि ग्रह उच्चं न भवति परन्तु चन्द्रोऽत्र नीचस्थोऽवश्यो भवति। गुरुचन्द्रसूर्या अत्र मित्रवद् भवन्ति। बुधशुनिशुक्राः शत्रुवद् फलं ददति। वृश्चिकलगनं प्रायः रहस्यात्मकरिति मन्यते।

फलदीपिकायां आचार्येण मन्त्रेश्वरेण लग्नगतवृश्चिकराशेः फलविवेचनमेनेन प्रकारेण कृतमस्ति यत् वृश्चिक-लग्नोत्पन्न जातकस्य ऊरू जानू च गोलं भवति। नेत्रवक्षौ विशालौ भवतः। बाल्यकालैव पितृगुरुभ्यां विच्छेदो जायते। स्वभावेन क्रूरो राजकुलप्रमुखश्च भवति। तस्य हस्तपादाभ्यां कमलरेखाः भवन्ति।[5] तदनन्तरं जातकाभरणकारस्य मतं विद्यते वृश्चिकलग्नोत्पन्नमनुष्यः शूरात्यन्तविचारयुक्तो निर्दुष्टविद्यायुक्त विवादग्रहस्तश्च भवति।[6] क्रमेऽस्मिन् वृद्धयवनजातकस्य मतं दृष्टव्यमस्ति यदि जन्मसमये वृश्चिकलग्नोदयो भवेत् चेत् मनुष्यप्रचण्डस्वभावयुक्तग्रातयधिका-भिमान्यत्यधिकशूरविशिष्टज्ञानयुक्तः काव्यकर्ता कृतज्ञक्रोधीविकीर्णभाग्यसम्पत्तियुक्तो भवति।[7] भावार्थरत्नाकरग्रन्थानुसारं यदि वृश्चिकलग्नं भवेद् तथा च गुरुबुधयोः युति स्यात् उत् दृष्टिसम्बन्धो भवेत् तर्हि अयं विशेषधनप्रदायकयोगो जायते।[8]

**लग्नगतधनुराशेः फलम् -**

धनुलग्नस्य स्वामी शुभसन्तानकारकगुरुस्ति। धनुराशिः पुरुषराशिः। पर्वतचरसमोदयीशब्दकारी-पूर्वदिक्स्वामीदृशरीरक्रान्तिरहितपीतवर्णक्षत्रियजातिपित्तप्रकृत्युष्णस्वभावाल्पापत्यचरस्थिरद्विस्वभावात्मकाग्नितत्वक्रूरस्वभावयुक्तो भवति।

आचार्येण मन्त्रेश्वरेण लग्नगतधनुराशेः कुलविवेचनमनने प्रकारेण कृतमस्ति। यस्य जन्मो धनुलग्ने भवति तस्य मुखग्रीवे लम्बकाये भवतः। तस्य नासिकाकर्णौ अपि बृहद् भवतः। सेत्यन्तकर्मठवक्राराजप्रियश्च भवति। परिपक्वता समायाति। त्यागीशत्रुजयीव्यवहारप्रियबली च भवति।[9] जातकभरणग्रन्थे उक्तमस्ति यत् धनुलग्नोत्पन्नमनुष्य

---

[1] चलत्कृशाङ्गोऽल्पसुतोऽतिभक्तो देवद्विजानामटनो द्विनामा।
प्रांशुश्च दक्षः क्रयविक्रयेषु धीरोऽदयस्तौलिनि मध्यवादी ।। फलदीपिका 09/07

[2] गुणाधिकत्वाद्द्रविणोपलब्धिर्वाणिज्यकर्मण्यतिनैपुणत्वम्।
पद्मालया तन्निलये न लोला लग्नं तुला चेत्स कुलावतंसः।। जातकाभरण लग्नफल 07

[3] तुलाविलग्ने तु नरः प्रसूतः स्वकर्मणा जीवति बुद्धिमांश्च ।
विद्वत्प्रियः सर्वकलास्वभिज्ञश्चलस्वभावो वनिताजितश्च॥ वृद्ध यवन जातकम् 24/07

[4] तुलालग्ने तु जातस्य शनिर्योगप्रदो भवेत् ।
तृतीय षष्ठनाथोऽपि गुरुर्योगप्रदो भवेत् । भावार्थ रत्नाकर 01/01

[5] वृत्तोरूजङ्घः पृथुनेत्रवक्षा रोगी शिशुत्वे गुरुतातहीनः ।
क्रूरक्रियो राजकुलाभिमुख्यः कीटेऽब्जरेखाङ्कितपाणिपादः ।। फलदीपिका 09/08

[6] शूरो नरोऽत्यन्तविचारसारोऽनवद्यविद्याधिकतासमेतः ।
प्रसूतिकाले किल लग्नशाली भवेदलिस्तस्य कलिः सदैव ।। जातकाभरणलग्नफल 08

[7] जातो विलग्ने खलु वृश्चिके स्याच्चण्डोऽभिमानी पुरुषोऽतिशूरः।
विज्ञानवान् काव्यकरः कृतज्ञः स्यात् संविभागी बहुरोषचित्तः॥ वृद्ध यवन जातकम् 24/08

[8] वृश्चिके जायमानस्य गुरुसौम्य परस्परम् ।
संबन्धिनो यदि भवेद्विशेष धनयोगदै ।। भावार्थ रत्नाकर 01/01

[9] दीर्घास्यकण्ठः पृथुकर्णनासः कर्मोद्यतः कुब्जतनुनृपेष्टः ।

पण्डितराजसेवीदृढ़संकल्पी- सुन्दरकलाज्ञधनुर्विद्याविशारदश्च भवति।[1] अथ च वृद्धयवनजातके दृष्टव्यमस्ति यत् जन्मसमये धनुलग्नं स्यात् तर्हि मनुष्यः स्वकुले प्राधान्यं प्राप्नोति, सौभाग्ययुक्तशूरवीरधनिकभययुक्तभीरुकृतज्ञसहचारीस्वस्थशरीर युक्तो भवति।[2] आचार्य रामानुजाचार्येणानुसारं विभिन्नमतं प्रस्तुयते। धनुलग्नं भवेत् चेत् एकादशस्थः शनिः धनादिप्रदायको भवति। अन्यलग्नं भवेत् चेत् एकादशभावस्थशनिरधिकधनादि न ददाति।[3]

**लग्नगतमकरराशेः फलम् -**

मकरलग्नं शनिना शासितं भवति। मकरराशिः चरसंज्ञकभूमितत्वाल्पशब्दप्रिय दक्षिणदिक् स्वामीस्त्रीराशिपिङ्गल-वर्णकान्तिरहितसौम्यभूचरशीतलस्वभावसन्तानवायुतत्वरात्रि- बलिचतुष्पादविषमोदयीवैश्यवर्णशिथिलशरीरसंयुक्तो भवति।

फलदीपिकायामाचार्येण लग्नगतमकरराशिफलविवेचनमित्थं प्रकारेण कृतमस्ति। मकरराशौ गते जन्मे मनुष्यो दुर्बलः परञ्च आत्मबलेन संयुक्तो जायते। आचारविचारयुक्तः, वयाधिक्यां स्त्र्यामनुरक्तो भवति। परमधार्मिक-सौभाग्यययावरश्च जायते। निर्लज्जो वात्पीडितश्च भवति।[4] तदनन्तरं लग्नरगतमकरराशिफलविवेचनं जातकभरणकारेण क्रियते। मकरलग्नोत्पन्नः जातकः कुरूपधूर्त्तस्वच्छन्दसंततिचतुरान्तलोभी च भवति।[5] अस्मिन्नेव क्रमे वृद्धजवनजातकस्य मतं दृष्टिगोचरो भवति यत् यदि मकर लग्नोदयकाले जन्मो जायते चेत् कुलीननीचकार्येषु निमग्नः, नैकपुत्रदासयुक्तः, लोभी, आलस्यप्रियः स्वप्रशंसाप्रियकृतघ्नस्वार्थरतगुरुप्रियश्च भवति।[6] भावार्थरत्नाकरग्रन्थानुसारं विभिन्नानि मतानि विद्यन्ते। यदि मकरलग्नं स्यात् बुधोऽष्टमभावगतो भवेद् तथा च लग्ने गुरौ शुक्रदृष्टिः स्यात् तर्हि जातको दीर्घायुर्निधनश्च भवति।[7]

**लग्नगतकुभराशे फलम् –**

कुम्भराशिः चरणहीनपुरुषराशिस्त्रीसंगसंततिवनचरवायुराशिस्नेहोष्णस्वभावार्द्धस्वर-समवातपित्तकफप्रकृति-शूद्रवर्णप्रतीचीदिक् स्वामीविषमोदयीक्रूरस्वभावयुक्तो भवति।

फलदीपिकायामाचार्यमन्त्रेश्वरेण लग्नगतकुम्भराशेः फलविवेचनमनेन प्रकारेण कृतम्। यो व्यक्तिः कुम्भलग्ने जन्मे जातः सो गोपनीयरूपेण पापकर्मं करोति। तस्याकृतिः घटसदृशा भवति। आघाते पटुः, यात्रायां सहनशीलः, धनेन समान्यः, परीर्थी च भवति। तस्य जीवने हानिलाभ क्रमेण चलति तथा च पुष्पसुरभिप्रियो भवति।[8] क्रमेऽस्मिन् जातकाभरणकारस्य मतं वर्तते यत् कुम्भलग्नोत्पन्नमनुष्यः चञ्चलः, कामुकः, सुन्दरः, मित्रप्रियः, धान्योपार्जनकरश्च जायते।[9] अथ च वृद्धयवनजातके यदि जन्मसमये कुम्भलग्नोदयो जायते तर्हि मनुष्यः कुलीनः चञ्चलः, मैत्रीभावयुक्तः,

---

प्रागल्भ्यवात्त्यागयुतोऽरिहन्ता साम्नैकसाध्योऽश्विभवो बलाढ्यः।। फलदीपिका 09/09

1 प्राज्ञश्च राज्ञः परिसेवनज्ञः सत्यप्रतिज्ञः सुतरां मनोज्ञः ।
सुज्ञः कलाज्ञश्च धनुर्विधिज्ञश्चेनुर्धनुर्यस्य जनुस्तनुः स्यात् ।। जातकाभरण लग्नफल 09

2 धनुर्विलग्ने भवति प्रसूतः कुलप्रधानः सुभगो मनुष्यः।
शूरोऽर्थवान् भीतिपरः कृतज्ञो बन्धूपभोग्यो द्रविणो वपुष्मान्॥ वृद्ध यवन जातकम् 24/09

3 धनुर्लग्ने तु जातस्य लाभस्थो योगदश्शनिः।
इतरक्षे तु जातस्य लाभमन्दो न योगदः।। भावार्थ रत्नाकर 01/02

4 अधः कृशः सत्त्वयुतो गृहीतवाक्योऽलसोऽगम्यजराङ्गनेष्टः ।
धर्मध्वजो भाग्ययुतोऽटनश्च वातादितो नक्रभवो विलज्जः।।फलदीपिका 09/10

5 कठिनमूर्तिरतीव शठः पुमान्निजमनोगतकृद् बहुसन्ततिः ।
सुचतुरोऽपि च लुब्धतरो वरो यदि नरो मकरोदयसम्भवः।।जातकाभरण लग्नफल 10

6 मृगस्य लग्ने पुरुषोऽभिजातः स्यान्नीचकर्मा बहुभृत्यपुत्रः।
लुब्धोऽलसः स्वात्मपरः कृतघ्नः स्वकार्यनिरतो गुरुवत्सलश्च॥ वृद्ध यवन जातकम् 24/10

7 मकरे जायमानस्य अष्टमस्थो भवेद्बुधः।
लग्नसंस्थो यदि गुरु शुक्रेण च निरीक्षितः।।
दीर्घायुर्योगमाप्नोति जातस्तत्र न संशयः।
निर्धनश्च भवेज्जातोह्यत्रापि च न संशयः ।। भावार्थ रत्नाकर 01/1-2

8 प्रच्छन्नपापो घटतुल्यदेहो विघातदक्षोऽध्वसहोऽल्पवित्तः ।
लुब्धः परार्थी क्षयवृद्धियुक्तो घटोद्भवः स्यात्प्रियगन्धपुष्पः ॥ फलदीपिका 09/11

9 लोलस्वान्तोऽत्यन्तसञ्जातकामश्चञ्चद्देहः स्नेहकृन्मित्रवर्गे ।
सस्यारम्भः सम्भवैर्युक्सदम्भश्चेत्स्यात्कुम्भे सम्भवो यस्य लग्ने ।। जातकाभरण लग्नफल 11

धनधान्यपरिपूर्ण:, क्रूर:, स्वार्थी, परस्त्रीगामी च भवति।[1] भावार्थरत्नाकरग्रन्थानुसारं विभिन्नमतं प्रस्तुयते। कुम्भलग्नं उत् सिंहलग्नं स्यात् नवमेशदशमशयो: दृष्टियुतिसम्बन्धेन विशेषयोगप्राप्तिर्न भवति।[2]

**लग्नगतमीनराशे: फलम् -**

मीनराशि चरणसहितं भवति। स्त्रीराशिकफात्मकजलतत्वरात्रिबलीशब्दहीनधूम्रवर्ण-द्विस्वभावजलचरस्नेह-सन्तानयुक्तब्राह्मणवर्णशुभराशिविषमोदयोत्तरदिक्स्वामी भवति।

आर्चामन्त्रेश्वरेण लग्नगतमीनराशिफलविवेचनमनेन प्रकारेण कृतमस्ति। मीनराशे: लग्ने जातो जातकोऽधिकं जलं पिबति। तस्य शरीरं पुष्टसुदरञ्च भवति। स्वस्त्र्यामनुरक्तो भवति। जलीयपदार्थव्यवसायेण भरणपोषणं करोति। विद्वान्कृतज्ञशत्रुजयभाग्यशालीशुभसुन्दर-नयनयुक्तो भवति।[3] अस्मिन् क्रमे जातकभरणकारस्य मतं विद्यते यत् मीनलग्नोत्पन्नो मनुष्य: चतुर:, अल्पाहारी, अल्पकामी, रत्नसुवर्णयुक्त:, चंचल:, धुर्त्त: नैकाक्रियाशीलो भवति।[4] तदनन्तरं वृद्धजवनजातकस्य मतं वर्तते यन्मीनलग्ने जातो मनुष्य कुलीन:, विद्याधनयुक्त:, खल्वाट, परार्थी, स्वाभिमानी, शास्त्रविशारद: बुद्धियुक्तश्च भवति।[5] भावार्थरत्नाकरग्रन्थानुसारं विभिन्नमतं दृष्टव्यं वर्तते। मीनलग्ने जातस्य जातकस्य द्वादशस्थाने स्थित: शुक्रो योगप्रदो न भवति। परञ्च अन्यलग्नानां द्वादशभावे स्थित: शुक्रो योगप्रद फलं ददाति।[6]

---

1 कुम्भस्य लग्ने पुरुषोऽभिजातश्चलस्वभावः स्थिरसौहृदश्च।
प्रभूतधान्यार्थयुतः प्रचण्डो लुब्धोऽन्यनारीरतिलालसश्च ॥वृद्ध यवन जातकम् 24/11

2 कुंभे सिहे तु जातस्य योगो नैव विशेषकः ।
भाग्यराज्येश सम्बन्धमात्रेणेति विदूर्भुधाः।। भावार्थ रत्नाकर 01/1

3 अत्यम्बुपानः समचारुदेहः स्वदारगस्तोयजवित्तभोक्ता।
विद्वान्कृतज्ञोऽभिभवत्यमित्रान् शुभेक्षणो भाग्ययुतोऽन्त्यराशौ ।। फलदीपिका 09/12

4 दक्षोऽल्पभक्षोऽल्पमनोभवश्च सद्रत्नहेमा चपलोऽतिधूर्तः ।
स्याना च नानारचनाविधाने मीनाभिधाने जनने विलग्ने ।। (जातकाभरण लग्नफल 12)

5 मीने विलग्नोपगतेऽभिजातः प्रभूतवित्तद्रविणोऽल्पकेशः।
त्यागात्मवान् शास्त्रविशारदश्च न दीर्घसूत्रो न च मन्दबुद्धिः॥ वृद्ध यवन जातकम् 24/12

6 मीने कुम्भे च जातस्य व्ययशुक्रो न योगदः ।
इतरे जायमानस्य व्ययशुक्रशुभप्रदः ।। भावार्थ रत्नाकर 01/01